International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(2): 22-26
© 2018 IJSR
www.anantaajournal.com
Received: 06-01-2018
Accepted: 07-02-2018

**Sudipta Dey**
Ph.D Research scholar at Rashtriya Sanskrit Vidyapeetha, Tirupati

**Correspondence**
**Sudipta Dey**
Ph.D Research scholar at Rashtriya Sanskrit Vidyapeetha, Tirupati

# सिद्धिचतुष्टयेषु सुरेश्वरकृतनैष्कर्म्यसिद्धौ द्वितीयाध्याये दृष्टान्तपर्यावलोकनम्

**Sudipta Dey**

**प्रस्तावना**

## उपोद्घातः

नैष्कर्म्यसिद्धिरिति वेदान्तप्रकरणम्। अतोऽशेषवेदान्तसारसंग्रहप्रकरमिदमारभ्यत इति ग्रन्थारम्भ एव सुरेश्वरैरुक्तम्।

प्रकरणार्थश्च अनर्थानर्थहेतुपुरुषार्थतद्धेतुप्रकरणार्थसंग्रहख्यापनायोपन्यासः ऐकात्म्याप्रतिपत्तिर्या (1-7) इति श्लोकात् पूर्वं कण्ठतोभिहित इत्यर्थः इति तैरेव कण्ठोक्तोऽर्थः। तथा च अनर्थः अनर्थहेतुः पुरुषार्थः तद्धेतुश्चेति प्रकरणेऽस्मिन् प्रतिपाद्याश्चत्वारोऽर्थाः।

## नैकर्म्यसिद्धिनामधेयार्थ

नैष्कर्म्यं नाम निष्कर्मभावः कर्मशून्यता। सैषा ज्ञानयोगेन निष्ठा निष्क्रियात्मस्वरूपावस्थितिरिति पर्यवसितार्थः। तस्य सिद्धिः। तामधिकृत्य कृतो ग्रन्थः। नैष्कर्म्यसिद्धिर्हि फलम्। नित्यनैमित्तिकरूपकर्मणामननुष्ठानमात्रान्न सिद्ध्यति। नापि तत्सन्यासात् केवलात्। अपि तु तत्त्वज्ञानसहितात् तत्सन्यासात्।

**न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।**
**न च सन्यसनादेव सिद्धिं समधिगच्छति।।(गीता 3-4) इति वचनात्।**

तच्च फलं ज्ञानेनाज्ञाननिवृत्तिमात्रेण सेत्स्यति। अथवा नैष्कर्म्यस्य पूर्वोक्तस्य हेतुभूतासिद्धिः, तत्त्वज्ञानमित्यर्थः। तथा च ज्ञानतत्फलयोः प्राधान्येन व्यपदेशो भवन्ति इति न्यायेन ग्रन्थस्य नामकरणम्। केवलज्ञानमेव मोक्षसाधनं साक्षात् इति सूचनाय तथा नामकरणम् सिद्धिपदेन कृतम्। तदाह भगवान्-

**असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।-**
**नैष्कर्म्यसिद्धिं परमां सन्यासेनाधिगच्छति।।(गीता 18-49)** इति।

अध्यायचतुष्टयेषु द्वितीयाध्याये अतस्तदर्थाप्रतिपत्तौ यत्कारणं तदपनयनाय द्वितीयाध्याय आरभ्यत, इत्युक्त्वा वाक्यार्थज्ञानं प्रति उपायभूततत्त्वंपदार्थविवेचनं विस्तृतमत्र। तस्मात् द्वितायाध्याये प्रतिपादिताः केचन दृष्टान्ताः अधः प्रतिपाद्यन्ते।

## दृष्टान्ताः

### 1) पिशाचकवदाप्नुयात्

ब्रह्मात्मैक्यरूपस्य अर्थस्य प्रतिपत्तिः वाक्यादेव केवलाद्भवति इति सिद्धान्तः। अस्य

सिद्धान्तस्य सम्यक् स्थापनार्थं वाक्यश्रवणे सति असति च ज्ञानोत्पत्तिः दृश्यते इति पूर्वपक्षः प्रदर्श्यते-

**कृत्स्नाऽनात्मनिवृत्तौ च कश्चिदाप्नोति निर्वृत्तिम्। श्रुतवाक्यस्मृतेश्चाऽन्यः स्मार्यते च वचोऽपरः।। इति(नैष्कर्म्यसिद्धिः 2-2)**

कश्चिद्विमलमतिः कृत्स्नप्रपञ्चविलापने सति भेदकोपाधेरभावादेकत्वं वाक्यन्तरेणापि प्रतिपद्यते यथा विराडात्मा यन्मदन्यन्नास्ति कस्माद् बिभेमीति। कश्चिच्छ्रुतं वाक्यं स्मृत्वा प्रतिपद्यते। यथा भृगुः यतो वा इमानि भूतानि जायन्ते, इति वाक्यस्मृतेः आनन्दो ब्रह्मेति व्याजानात् इति। वाक्यं स्मर्यमाणोऽसम्भावनाविपरीतभावनानिराकरणमुखेन साक्षादहमस्मि परं ब्रह्मेति वाक्यार्थं प्रतिपद्यमुच्यते इति तथा श्वेतकेतुर्नवकृत्वस्तत्त्वमसि इति स्मारितः। श्वेतकेतुः भृग्वोः वाक्यस्मरणमेव हेतुर्न वाक्यमिति त्रिष्वपि पक्षेषु न वाक्यं हेतुरित्यर्थः।

कथं तर्हिवाक्यस्य हेतुत्वशंङ्का इत्यस्य समाधानार्थमुच्यते पिशाचकवदाप्नुयात् इति उदाह्रियते। तथा हि वाक्यश्रवणमात्रेण च पिशाचकवदाप्नुयात्(नै. सि 2-3) इति। अस्यायमर्थः पिशाचकोनाम कश्चित् अरण्यं गतः तत्र ब्रह्मविचारपरैः अधीयमानं तत्त्वमस्यादि वाक्यमाकर्ण्य जन्मान्तरसंस्कारवशात् तदैव वाक्यार्थं बुध्वा मुक्त अभूत् इति लोके प्रसिद्धिः। एतेन ज्ञायते यत् पिशाचकस्य वाक्यश्रवणमात्रादेव मुक्तिः सिद्धेति। विराट्-श्वेतकेतु-भृगुणां विषयेषु वाक्यश्रवणमात्रं तु न मुक्तिहेतुः। तस्मात् वाक्यमेव नियमेन ज्ञानोत्पत्तिहेतुः न भवति इति प्रदर्शनार्थं पिशाचवदानप्नुयात् इत्युदाहृतम्।

**2) स्रगालेपनवद्देहं तस्मात्पश्येद् विविक्तधीः**

त्वम्पदार्थंशोधनाय स्थूलदेहे आत्ममर्तिं निरासयितुं शुरेश्वराचार्याः कथयन्ति-

**प्रागनात्मैव जग्धं सदात्मतामेत्यविद्यया। स्रगालेपनवद्देहं तस्मात्पश्येद्विरक्तधीः।। इति (नैष्कर्म्यसिद्धिः 2-12)**

अस्यायमर्थः पुरीषस्य अन्नपरिणामरूपस्य यथाऽनात्मत्वं ज्ञायते तद्वत् अन्नपरिणामयोः देहेन्द्रिययोः अनात्मत्वं (देहेन्द्रियादयः, आत्मा न भवन्ति आगन्तुकत्वात्। यद्यदागन्तुकं तत्तत् अनात्मा स्रगालेपनवत्।) इत्यनुमानात् अवगन्तव्यम् इति। न केवलम् अन्नकार्यत्वात् अनात्मत्वम् अपि तु अन्नात्मकत्वादपि (अन्नस्वरूपत्वात्) अन्नवदेव अनात्मत्वम् अनुमातव्य एतत् प्रदर्शनार्थम् उच्यते स्रगालेपनवत् इति। यथा स्रगालेपने (माला चन्दनादि) धारणकालेऽपि अनात्मतया अवगच्छति व्युत्पन्नमतिः एवं विद्वान्देहादिकं भिन्नतया जानीयात् इत्यर्थः।

एतदुक्तम्- भक्षणात् प्राक् अनात्मतया निर्धारितमन्नं भक्षणोत्तरम् अविद्यया अध्यासरूपया देहात्मनापरिणतम् आत्मभावं प्राप्नोतीव। यथा पुष्पाङ्गरागादिकधारणात् प्राक् धारणाद्यनन्तरं च विवेकमतिः अनात्मत्वेनैव जानाति न कदापि तादात्म्यं प्राप्नोति तद्वत् आत्मानात्मविवेकी देहेन्द्रियादिकम् अन्नमयत्वाच्च आत्मतया न गृहीयात्। सदा देहेन्द्रियादि भिन्नतयैव तत्साक्षित्वेनैव आत्मानं जानीयात् इत्येतत्- स्रगालेपनवद्देहं तस्मात्पश्येद्विरक्तधीः इति दृष्टान्तेन प्रतिपाद्यते।

**3) बुसव्रीहि पलालांऽशैर्बीजमेकं त्रिधा यथा**

पुरीषस्य अन्नकार्यत्वात् अनात्मत्वं स्पष्टं यथा ज्ञायते तद्वदन्नकार्यत्वात् अन्नात्मकत्वाच्च इन्द्रियमहितस्य देहस्य अनात्मत्वं विदुषा ज्ञेयम् इत्युक्तम्।

**वर्चस्कं त्वन्नकार्यत्वाद्यथाऽनाऽत्मेति गम्यते। तद्भागः सेन्द्रियो देहस्तद्वत्किमिति नेक्ष्यते।। इति (नै. सि 2-11)**

अनेन श्लोकेन देहानात्मत्वे अनुमानम् उक्तम्। देहेन्द्रियादिकम् अनात्मा अन्नकार्यत्वात् यथा पुरीषम् इति। न केवलमनुमानप्रमाणेन देहस्यानात्मत्वम्। अपि तु आगमोऽपि एतत् प्रतिपादयति इति बुसव्रीहि पलालदृष्टान्तेन उच्यते यथा-

**बुसव्रीहिपलालांऽशैर्बीजमेकं त्रिधा यथा। बुद्धिमांसपुरीषांशैरन्नं तद्वदवस्थितम्।। इति (नै. सि 2-15)**

**अन्नमशितं त्रिधा विधीयते तस्य यः स्थविष्टो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मासं योऽणिष्ठस्तन्मनः(छा. उ 6-5-1)**

अस्यायमर्थो भुक्तमन्नं जठरे अग्निना पच्यमानं त्रिधाविभज्यते। त्रिधा विधीयमानस्य अन्नस्य यो स्थूलतमो भागः तत् पुरीषं भवति। यो मध्यमो अंशः रसादिक्रमेण परिणम्य मासं भवति यो अतिसूक्ष्मो भागः सः वागादिकर्मसङ्घातस्य स्थितिमुत्पादयन् मनो भवति इति। अनया श्रुत्या अन्नस्य देह परिणमित्वं(कार्यत्वं) बोध्यते। अन्नं तु अनात्मेत्यत्र नास्ति विवादः। तत्कार्यभूतः सेन्द्रियदेहोऽपि अनात्मेति प्रत्येतव्यमिति अन्नमशित इत्यादिश्रुतेराशयः तत् श्रुति सिद्धार्थं शुरेश्वराचार्यः प्रतिपादयन्ति बुद्धिमांसपुरीषां शैरन्नं तद्वदवस्थितम् इति। एकस्य वस्तुनः त्रिधा अवस्थाने उदाहरिष्यन्ति च बुसव्रीहिपलालांऽशैबीजमेकं त्रिधा यथा इति। यथा एकमेवबीजं बुसवीहिपलालांसैस्त्रिधापरिणतं भवति तद्वदन्नम् एकमेव बुद्धिमांसपुरीषात्मना त्रेधा परिणतं भवति अतः अनात्मा।

**4) घटाऽऽदिवच्च दृश्यत्वात्तैरेवकरणैर्दृशेः**

त्वंपदार्थभूते प्रत्यगात्मनि देहद्वयपरिच्छिन्नत्वबुद्धिरेव तद्याथात्म्यापरिज्ञाने प्रतिबन्धः। अतः तत्त्वमसि इत्यादि वाक्यार्थप्रतिबन्धकत्वात् देहद्वये अहंकार ममकार लक्षणोऽभिमानः विवेकिभिः न करणीय इति देहस्यानात्मत्वप्रतिपादनं दृश्यत्वागमापायित्वादिहेतुभिः प्रदर्शयितुं घटादिवदिति दृष्टान्तः उक्तः। तथाहि-

**घटाऽदिवच्च दृश्यत्वात्तैरेव करणैर्दृशेः।**
**स्वप्ने चाऽनन्वयाज्ज्ञेयो देहोऽनात्मेति सूरिभिः।। इति (नै. सि 2-19)**

अस्याभिप्रायः चन्द्रिकायाम् एवमुक्तः – यैः करणैर्घटादयो दृश्यन्ते, तैरेव करणैर्दृशेर्द्रष्टुरात्मनो देहस्य दृश्यत्वात् स्वप्ने च व्याघ्रादिशरीरेण व्यवहारतो जाग्रति दृष्टे देहेऽहमित्याभिमानाभावेनास्यानन्वयाच्चानात्मत्वं वेदितव्यमित्यर्थः।

**5) कृशत्ववत्, वस्त्रवत्**
**प्रागनात्मैव जग्धं सदात्मतामेत्यविद्यया।**
**स्रगालेपनवद्देहं तस्मात्पश्येद्विविक्तधीः।। (नै. सि 2-12)**
**घटाऽऽदिवच्च दृश्यत्वात्तैरेव करणैर्दृशेः।**
**स्वप्ने चाऽनन्वयाज्ज्ञेयो देहोऽनात्मेति सूरिभिः।।(नै. सि 2-19)**

इत्यादिभिः स्थूलदेहस्य अनात्मत्वं प्रतिपाद्य, सूक्ष्मशरीरस्याऽपि अनात्मत्वं प्रतिपिपादयिषुः देहं सूक्ष्मं निराकुर्यादतो युक्तिभिर्रात्मनः इति सूक्ष्ममदेहस्य अनात्मत्वनिरूपणप्रसङ्गे उदाहरति कृशत्ववत् वस्त्रवत् इति वक्ष्यमाणे श्लोके

**अहंममत्वयत्नेच्छा नाऽऽत्मधर्माः कृशत्ववत्।**
**कर्मत्वेनोपलभ्यत्वादपायित्वाच्च वस्त्रवत्।। इति (नै. सि 2-22)**

अस्यायमभिप्रायः अहंकार ममकारबुद्धिसुखेच्छाद्वेषप्रयत्नादयो वैशेषिकादीनामात्मधर्मत्वेनाभिमता वस्तुतो नात्मधर्मा भवितुमर्हन्ति कामस्सङ्कल्प इत्यादि श्रुतेः। तत्र हेतुः कर्मत्वेनोपलभ्यत्वात् कृशत्ववत्। अपायित्वाच्च वस्त्रादिवत्। नहि विदिक्रियाकर्मत्वेन उपलभ्यमानानां कामसङ्कल्पादीनां क्षेत्रज्ञधर्मत्वं सम्भवति। कुतः कर्मत्वेनोपलभ्यत्वात्। इच्छाद्वेषप्रयत्नादिमयं सप्तदसावयवोपेतं सूक्ष्मशरीरम् आत्मा न भवति।

**बुद्धि कर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।**
**शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते।।( पञ्चदशी 1-23)**

एवं वस्त्रादिवत् अपायित्वात् च सूक्ष्मशरीरम् आत्मा न। अत्र–

**वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि**
**तथा शरीराणि विहाय जीर्णानन्यानि संयाति नवानि**
**देही।।(गीता 2-22)**

इत्यादि गीताश्लोके उदाहृतन्यायोनुसन्धेयः। एवं च धर्माणाम् अहंत्वादीनामनात्मधर्मत्वे सति तद्वतः सूक्ष्मदेहस्यापि अनात्मत्वं सिध्यतीति भावः।

**6) नोष्मिमानं दहत्यग्निः स्वरूपत्वाद्यथा ज्वलन्**

अयं दृष्टान्त इच्छादीनाम् अनात्मधर्मत्वमेव न त्वात्मधर्मत्वमिति प्रतिपादनार्थमुक्तः। अयं वैधर्म्ये दृष्टान्तः कर्मत्वे नोपलभ्यत्वम् आगमापायित्वं च यत्र स न आत्मधर्म इत्यत्र कृशत्ववत् वस्त्रवत् इति च साधर्म्यदृष्टान्तावुक्तौ। यत्र उपलभ्यत्वं यथा कृशत्वादौ आगमापायित्वं च यथा वस्त्रादौ तत्र अनात्मत्वं दृष्टमिति। अथ यद्धर्मा यः पदार्थो न तस्यैवेयात्स कर्मताम् (उपदेशसाहस्री 16-13) इति न्यायेन यत्र स्वात्मधर्मत्वं न तत्र स्वात्मविषयत्वम्। तदुक्तम्-

**नोष्मिमानं दहत्यग्निः स्वरूपत्वाद्यथा ज्वलन्।**
**तथैवाऽऽत्माऽऽत्मनोविद्यादहं नैवाऽविशेषतः।। इति( नै. सि 2-23)**

यथा ज्वलन्नग्निः स्वरूपभूतं धर्मभूतं च उष्णिमानं न दहति, न विषयी करोति स्वरूपत्वात् धर्मत्वात्तद्वदात्मापि स्वरूपभूतं धर्मभूतं वा अहंकारादि न विषयीकुर्यादित्यर्थः। वैशेषिकादय अहंकारकामादीनाम् आत्मधर्मत्वम् इच्छन्ति तन्नोपपद्यते। यदि आत्मधर्मा भवेयुः कामादयः तर्हि ते नैव आत्मना गृह्येरन् यद्धर्मा यः पदार्थः... इति न्यायविरोधात्। नहि स्वरूपभूतम् उष्णिमानं ज्वलन्नप्यग्निः दहति। कामादयस्तु कर्मत्वेन अनुभूयन्ते आत्मना। अत एव अहंकारादयो न आत्मधर्माः किन्तु श्रुति प्रमाणेन (कामः संकल्पः...बृ. उ 1-4-3) प्रकृतन्यायेन च अन्तकरणस्यैव धर्माः आत्मना ज्ञायन्त इति विविच्य कामरूपसूक्ष्मशरीरात् आत्मानं कामादिरहितं जानीयात् इत्यर्थः।

**7) घटप्रत्ययवत्**
**नोष्णिमानं दहत्यग्निः स्वरूपत्वाद्यथा ज्वलन्।**
**तथैवाऽऽत्माऽऽत्मनो विद्यादहं नैवाऽविशेषतः।।**
**(नैष्कर्म्यसिद्धिः 2-23)**

अनेन एकस्यात्मनः कर्मकर्तृभावः भवितुं नार्हति इति सिद्धान्तमनंगीकुर्वाणः भाट्टमीमांसक अहं प्रत्ययग्राहकत्वात् ग्राहक आत्मा इति प्रत्यवतिष्ठते। अस्यायमाशयो भवति यत् अहं प्रत्ययग्राहकत्वमेव ग्राहकस्य असाधारणं लक्षणम्। यतो हि अहं प्रत्यय ग्राह्यत्वरूपेण हि इदं प्रत्यय ग्राह्येभ्यो विषयेभ्यः प्रविविच्यतेऽसावात्मा। अत एव चास्य कर्तृत्वभोक्तृत्वेऽपि इदं करिष्येऽहं, इदं भोक्ष्येऽहं इति अहं

प्रत्ययग्राह्य एव सन् कर्माणि कुरुते तत् तत् विषयांश्च भुंक्ते इति। एतन्मतनिराकरणार्थमाह घटप्रत्ययवत्तस्मात् नाहंस्यात् द्रष्टृकर्मकः इति। तथा हि-

**यत्कर्मको हि यो भावो नाऽसौ तत्कर्तृको यतः।**
**घटप्रत्ययवत्ततस्मान्नाऽहं स्यात् द्रष्टृकर्मकः।। (नैष्कर्म्यसिद्धिः 2-24)**

अस्यायमर्थः यो भावो यत्कर्मको भवति नासौ तत् कर्तृको भवति इति प्रसिद्धं लोके। तत्र घटप्रत्ययवत् इति दृष्टान्तः। यथा घटप्रत्ययः घटकर्मकस्सन् घटकर्तृको न भवति, एवम् अहं प्रत्ययोऽपि यद्यात्मकर्मकः स्यात् तर्हि नासावात्मकर्तृकः स्यात्। अतः लोकविरुद्धत्वात् अहं प्रत्ययग्राह्यत्वात् ग्रहक आत्मा इति मीमांसकसिद्धान्तः असमीचीनः।
तस्मात् युक्तियुक्तत्वात् तथैवात्मात्मनो विद्यादहं नैवाविसेषतः इति सिद्धान्तः सुप्रतिष्ठितो भवति।

**8) स्थाणुधीरिव**

**तत्त्वमसि**(छा. उ 6-8-7), **अहं ब्रह्मास्मि**(बृ. उ1-4-10), **अयमात्मा ब्रह्म**(मा . उ- 2), **प्रज्ञानं ब्रह्म**(ऐतरेयोपनिषद् 3-1-3) **इत्यादिनि महावाक्यानि अन्वयव्यतिरेकाभ्याम् अवगतपदपदार्थाभिज्ञस्य निश्शेषमहंकारादिसंसारं समूलघातं घ्नन्ति इति अद्वैत राद्धान्तः। तत्र कारणं तु अहंकारादीनामनात्मधर्मत्वमेव। तदुक्तम्- अहंममत्व.. (नै. सि 2-22)इति।**

अमुं सिद्धान्तं पूर्वपक्षी एवं विघटयति यत् – सन्तुकाममनात्मधर्मा ममत्वादयो यथोक्तन्यायबलादनात्मतयैव च तेषु व्यवहारादहंरूपस्य तु प्रत्यगात्मसम्बन्धितयैव प्रसिद्धेरहं ब्रह्माऽस्मीति श्रुतेश्चाऽनात्मधर्मत्वमयुक्तमिति चेत् इति तस्य समाधानमुक्तम्।

**अहंधर्मस्त्वभिन्नश्चेदहंब्रह्मेति वाक्यतः।**
**गौरोऽहमित्यनैकान्तो वाक्यं तद्व्यपनेतृ तत् (नैष्कर्म्यसिद्धिः 2-28)।। इति।**

पूर्वोक्तपूर्वपक्षसमाधानयोः अयं साराशो भवति – ममत्वयत्नेच्छादिनाम् अनात्मधर्मत्वमस्तु नाम तेषु अनात्मतयैव व्यवहारदर्शनात् न हि कश्चित् तेषु आत्मबुद्धिं करोति आत्मशब्दं वा प्रयुङ्क्ते। अहं रूपस्य तु अनात्मधर्मत्वमिति नाङ्गीकुर्मः। तस्य प्रत्यगात्मतयैव प्रसिद्धेः। न हि अहंरूपमात्मसमवेतत्वं परित्यज्य अन्यत्र स्वातन्त्रेण क्वचित्प्रतीयते। अपि च वैदिकव्यवहारस्य सिद्ध्येऽपि अहंरूपस्य प्रत्यगात्मता नियमेन स्वीकार्य। य एवं वेद अहं ब्रह्मास्मि इति स इदं सर्वं भवति(बृ. उ 1-4-10) इति विद्यादशायामपि अहं रूपस्य अनुवृत्तेश्च अतः अहंकारः आत्मधर्म एव इति (पूर्वपक्षः)। इति विद्यादशायामपि अहं रूपस्य अनुवृत्तेश्च अतः अहंकारः आत्मधर्म एव इति(पूर्वपक्षः)।
अस्य पूर्वपक्षस्य समाधानमुक्तम् अहं धर्मस्त्वित्यादि श्लोकेन सामानाधिकरण्येन अहं ब्रह्मास्मि इत्यस्मिन् वाक्ये अहं निर्देशादेव अहंकारस्य आत्मधर्मत्वाङ्गीकारे गौरहमिति सामानाधिकरण्येन गौत्वमपि आत्मधर्मः स्यात्। तत्र गौत्वस्य सामानाधिकरण्येऽपि नात्मधर्मत्वं तथा अहं ब्रह्मास्मि इत्यत्राऽपि नाहंकारस्य आत्मधर्मत्वम्। तर्हि किमर्थं समानाधिकरण्यमिति चेत् समाधानमुक्तं वाक्यं तद्व्यपनेतृतत् इति। अहं ब्रह्मास्मि इति सामानाधिकरण्यं बाधायां न पुनस्तदेकत्वविवक्षया इत्यर्थः।
अस्मिन् प्रसङ्गे वाक्यं सामानाधिकरण्ये स्थितं कथं व्यपनेतृ भवतीति प्रश्नस्य समाधानावसरे इदमुदाहरणं प्रस्तुतं स्थाणुधीरिव इति। तथा हि-

**योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव।**
**ब्रह्माऽस्मीतिधियासेषामहं बुद्धिं निवारयेत्।।(नैष्कर्म्यसिद्धिः 2-29)**

अस्यायमभिप्रायः यथा कश्चित् मन्दान्धकारे पुरुषं स्थाणुत्वेन गृहीत्वा समीपं गत्वा योऽयं स्थाणुः पुमानेष इति पुरुषत्वेन निश्चिनोति तत्र पुंधिया उत्तरभाविन्या प्राक्तनो स्थाणुधीर्निवर्त्यते। एवम् अहं ब्रह्मास्मीति श्रुतिवाक्यदिया पूर्वं लब्धप्रसरा अहं मनुष्यः चक्षुष्मान् बुद्धिमान् इत्यादिरूपाशेषा अहं बुद्धिरपि निवर्त्यते। तस्मात् अहं ब्रह्मास्मि इति श्रुतिः न अहम् आत्मधर्मत्वप्रतिपादिका न भवतीत्यभिप्रायः।
विद्यारण्यश्रीचरणैरपि पञ्चदश्यां कूटस्थदीपे अहं ब्रह्मास्मि इत्यत्र बाधा सामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्तिकारैः सदृष्टान्तोऽभिहित इति तद्वाक्योदाहरणपूर्वकं दर्शितम्। तथा हि-

**योऽयं स्थाणुः पुमानेष पुधिया स्थाणुधीरिव।**
**ब्रह्माऽस्मि इति धियाऽशेषाप्यहंबुद्धिर्निवर्त्यते।।**
**नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितम्।**
**सामानाधिकरण्यस्य बाधार्थत्वमतोऽस्तु तत्।।(पञ्चदश्यां कूटस्थदीपप्रकरणे 43,44) इति।**

**9) आम्रादिफलवदितिचेत्(संबन्धग्रन्थे...)**

आत्मधर्म इव भासमान अहंकारो नात्मधर्मः किन्तु अनात्मधर्मः आत्मानात्मनोरज्ञानात् तादात्म्याध्यासे सति आत्मधर्म इव भाति। अहं ब्रह्मास्मि इति साक्षात्कारे जाते अहं बुद्धौ (जीवात्मा बुद्धौ) निवृत्तायां परमात्मैव भवति। अतः अहंकारो न आत्मधर्मः।

अनन्वयाच्च नात्मधर्मोऽहंकारः सुषुप्त्यादावननुभावच्चाहंकारस्य अनात्मधर्मत्वमभ्युपगन्तव्यम्। तदुक्तम्-

**आत्मनश्चेदहं धर्मो यायान्मुक्तिसुषुप्तयोः।**
**यतो नाऽन्वेति तेनाऽयमन्यदीयो भवेदहम्।।**
**इति(नैष्कर्म्यसिद्धिः 2-32)**

अपि च अहंकारस्य आत्मधर्मत्वाभ्युपगमे अपरिहार्यदोषप्रसक्तिश्च स्यात् तथाहि-

**यद्यात्मधर्मोऽहंकारो नित्यत्वं तस्य बोधवत्।**
**नित्यत्वे मोक्षशास्त्राणां वैयर्थं प्राप्नुयात् ध्रुवम्।।** इति (नैष्कर्म्यसिद्धिः 2-33)

अस्यायमाशयः यद्यात्मनो नित्यस्य अहंकारः अनित्यः धर्मः स्यात् तदा बोधवत् अहंकारोऽपि नित्य स्यात्। अस्तु को दोष इति चेत् न। अहंकारस्य नित्यत्वे बोधवत् सुषुप्तावप्युपलब्धिः स्यात् तथा च सुषुप्त्यभावप्रसङ्ग अनुभवविरोधश्च।

अपि च अहंकारस्य आत्मधर्मत्वे नित्यत्वात् मुक्तावपि सत्वात् विद्वान् नामरूपात् विमुक्तः(श्वेताश्वतरोपनिषद्) इत्यादि मोक्षशास्त्राणां वैयर्थं च स्यात्। अतः अहंकारो नात्मधर्मः।

अमुं सिद्धान्तमनङ्गीकुर्वाणः पूर्वपक्षी एवं प्रतिपादयति स्वपक्षम्। अहंकार आत्मधर्म एव। तस्य स्वाभाविकधर्मस्यापि आम्रफलस्य अम्लादेरिव निवृत्युपत्तेः इति तत्र उक्तं स्वाभाविकधर्मत्वाभ्युपगमेऽप्याम्रादि फलवदिति(नैष्कर्म्यसिद्धि 2-34) इति।

अस्य समाधानमुच्यते-

**आम्रादेः परिणामित्वाद् गुणहानिर्गुणाऽन्तरैः।**
**अविकारि तु तद्ब्रह्म निहि द्रष्टुरिति श्रुतेः।।**
**इति(नैष्कर्म्यसिद्धिः 2-34)**

अस्यायमर्थः सावयवस्याम्रादेः परिणामित्वात् माधुर्यादिगुणान्तरैः उद्भूतैः अम्लादेः पूर्वगुणस्य हानिर्भवति। अहंकारस्य आश्रयत्वेन पूर्वपक्ष्यभिमतं ब्रह्म तु अविकारि अपरिणामि कूटस्थनित्यम्। अतः तस्मिन् धर्मान्तरोत्पत्तिः तेन अहंधर्मस्य अभिभूतिर्वा न शक्या निरूपयितुम्। ब्रह्मणो अविकारित्वं च न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् (बृदहारण्यकोपनिषद् 4-3-23) इति सिद्धम्। अतः आम्रादिफलवत् इत्युदाहरणेनात्मनः अहंकारधर्मवत्वं निरूपयितुं न शक्यते।

## उपसंहार

सिद्धान्तमात्रप्रदर्शनपरप्रकरणग्रन्थः नैष्कर्म्यसिद्धिरिति श्रीमत्सुरेश्वराचार्यविरचितः। अयं ग्रन्थ अन्वर्थनामकः। अयं ग्रन्थः कारिकातद्वृत्तिरूपः अध्यायचतुष्टयात्मकश्च। तत्तत्प्रमेयनिरूपणार्थं तत्र तत्र श्लोकेषु श्लोकावतिणिकारूपसंबन्धवाक्येषु च बहवो दृष्टान्ताः उदाहृताः गन्थकर्त्रा। तस्मात् द्वितीयोऽध्याये वर्णिताः केचन दृष्टान्ताः अत्र मया पर्यावलोचिताः संक्षेपेण इति शिवम्।

## सहायकग्रन्थसूची


1. श्रीमद्भगवद्गीता, दिनकर विष्णु गोखले, परिमल पब्लिकेशन्स, दिल्ली, 2001।
2. श्रीमद्भगवद्गीता, प्रोफेसर. जोशी रसिकविहारी, चौखम्बा संस्कृत प्रतिष्ठान्, दिल्ली, 2010।
3. नैष्कर्म्यसिद्धिः, मण्डन मिश्र, गभर्ण्णमेण्ट प्रेस, माद्रास, 1937।
4. छान्दोग्योपनिषद्, गीताप्रेस्, गोरखपुर, एकादशसंस्करणम्, 2061सं।
5. पञ्चदशी, विद्यारण्य मुनिः, चैखम्बा संस्कृतप्रतिष्ठान्, दिल्ली, 1994।
6. बृहदारण्यकोपनिषद्भाष्यम्, पूर्णप्रज्ञसंशोधनमन्दिरम्, वेङ्गलूरु, 2006।
7. माण्डूक्योपनिषद्, गीताप्रेस्, गोरखपुर, विंशतिसंस्करणम्, 2061सं।
8. श्वेताश्वतरोपनिषद्, गीताप्रेस्, गोरखपुर, सप्तदशसंस्करणम्, 2060सं।
9. ऐतरेयोपनिषद्, गीताप्रेस्, गोरखपुर, उनविंशसंस्करणम्, 2060सं।